नं० ४८२४

नाम- विश्वसारतंत्रे कामेश्वर पञ्चाङ्गम्

कर्त्ता- ×

पत्र- ५० पत्राणि सं० ×

विषयः- तंत्रम्

✓

कामेश्वरपंचांगम्

विश्वसारोद्धारे

४८ २४



पं १

ॐ श्रीगणेशाय नमः श्रीदेव्युवाच प
ञ्चाङ्गं देवदेवस्य श्रोतुमिच्छामि हे प्रभो
कामेश्वरस्य देवेश वक्तुमर्हसि सांप्रतं प
रमेश्वरदेवस्य महाकामेश्वरस्य ते भक्त्या
वक्ष्यामि पञ्चाङ्गं नाविधेयस्य कस्यचित्
पटलं पद्धतिं वर्म मंत्रनामसहस्रकं स
स्तोत्रं मंत्राङ्गभूतं च गोपयेत् साधक
तत्रादौ पटलं वक्ष्ये दीक्षानायकवल्लभे
गुह्यं परमगुह्यं च गोपनं मन्त्रमुमुक्षुभिः
मंत्रोद्धारं प्रवक्ष्यामि कामेश्वरस्य ते प्रिये
वाग्भवं कामराजं च शक्तिस्तारं ततो वच
लक्ष्मीर्लज्जा महेशानि कूटत्रितयमेव च।
च कान्तिः शारङ्गिजे वाणी दुलिमी हर्ल्गी।
वैश्रवकौ मंत्रान्ते केशवीजस्य दादि।

कूटोयमीरितः शक्तिः कान्तिः स्मरो
मेकोधान्तजीमृतवक्त्रयः वीयके।
शैहिनोयोयं कूटराजेन वादरैः वा
युर्वह्निस्तमोम्बिदेवमेकार्णवायवः
सकलार्त्तिपदेवस्य कूटोयंयन्त्रजी
यकः तारमायाख्यलक्ष्मीस्त्रप्रदं श
क्तिस्तथैव च मन्मथोवाग्भवश्चैवं म
न्त्रोद्धारोयमीरितः नास्य विघ्नो न वा क्ले
शो न विपर्ययभीस्तथा नमोन्तेन च।
दारिद्र्यं वै मनस्यन जायते सिद्धसाध्य
विचारोपि वैरिवर्गो भवेन हि साध्यादस
तद्रूपोयं मणिमायाप्रसिद्धिदः पुरश्च।
र्याप्रकर्ववं निर्वाणलक्षं जपाद्विधि गुरुहः
स्तेन वादेविसाधकस्य करेणवा नकदा

ऐं क्लीं सौः ॐ श्रीं ह्रीं। हसकमलयऊं सहकमलवरयऊं
यरलकमय ॐ ॐ ह्रीं श्रीं हुं सौः ह्रीं

पं
२

विन्तकुर्वीतसहस्तेननसाधकः नति
थिर्नैवनक्षत्रंचनांशःन्यासश्चमन्त्रिणाम
नवारदोषोनोविघ्नोनशौचंनियमोन।
या माह्लादमृततत्त्वपोयंमंत्रःश्रीषोडशा
क्षरः ऋषिरस्माद्दक्षिणामूर्तिःपंक्तिश्छन्द
उदाहृतं देवताचमयाप्रोक्ताश्रीका।
मेश्वरंश्वरः लक्ष्मीबीजंपराशक्तिः।
कामःकीलकमीश्वरि चतुर्वर्गेषुविद्या
यांविनियोगःप्रकीर्तितः यंत्रोद्धारंप्र
वक्ष्यामिसर्वाशापरिपूरकम सर्वसंमो
हनंयंत्रंसर्वसिद्धिप्रदायकं त्रिकोणंबि
दुसंयुक्तंवसुकोणंसुरेश्वरि दशारयु
ग्मंमन्वश्रमष्टदलसमन्वितं षोडशारं
महेशानिवृत्तत्रयसमन्वितं धरणीत्रि।

तंयस्मरणंयंत्रमेतन्महेश्वरि यंत्रोद्धारं।
मयाख्यातंश्रीकामेश्वरदैवतं अथ॰
ध्यानंप्रवक्ष्यामिसर्वतंत्रेषुगोपितं सा
रंकामेश्वरस्यैतत्सर्वस्वंममपार्वति चं
द्रकोटिसमानाभंचंद्रमौलिंत्रिलोचनं
वराभयत्रिशूलासिकरंकामेश्वरंभजे
प्रयोगानथवक्ष्येहंदशतंत्रेषुगोपितम
येनसम्यग्विधानेनजीवन्मुक्तोभविष
ति स्तंभनंमोहनंचैवमारणाकर्षणे।
तथा वशीकारंतथोच्चाटंशांतिकंपौ
ष्टिकंतथा संतानिकंमौक्तिकंचप्रयो
गादशकीर्तिताः एतेषांसाधनंवक्ष्येज
गतांहितकाम्यया अभक्तायनदातव्य
नदुष्टायकदाचन रवौत्रिसंध्यायांप्रयोगनाडू

का
१

त्वापेतागृह्णातिकम् मूलंसाधकपुंवा।
शुक्लेपेदयुतंसम्यक्या होमोजातीफलैः
पुष्पैःपीतैश्चमधुपिमिश्रितैः शत्रुसैन्यानां
दसूतं वैरिणांस्तंभनंभवेत् स्तंभनं
जायतेशीघ्रंरविचन्द्रादिपर्वमास कु
ग्रहैकदिनेरात्रौदेवींसंपूज्यसाधकः
श्मशाकालिकांमहादेविशांतिपूजांविधा
नतः तथैवमहास्नानंकृत्वाध्यात्वाकामेश्व
रिप्रिये नदीतटेनयोगयानेनहृत्वाविष्ट
रासनः श्रुणुतत्वजपेन्मूलंहोमःपाय
ससर्पिषा तेननैलोल्ककल्केनभस्म
नातिलकंचरेत् मोहयेदखिलांलोका
न्मोहयेदपिकेशवं मोहयेदपिब्रह्मा।
णंकिंपुनःक्षुद्रमानुषा भौमेर्धरात्रम

मयेगत्वाश्मशानंदेवीशिवे संपूज्यविवि
धैर्मन्त्रैर्देवंसपरिवारकं अयुतंतज्जपे।
न्मूलंहोमयेद्घृतपायसं। रक्तचंदन
मिश्रंतस्तोकैश्चसमन्वितं प्रातुःका
लेसमानोपिमृत्युमेष्यतिनान्यथा बु।
धेनिशावसाने तुगत्वाश्मशानंदेवीप्रिये
जपेन्मूलंदिक्सहस्रंहोमयेद्घृतपा।
कैरं कर्णिकारसहस्राणिविल्वयुक्ता।
निपार्वति आकर्षयेद्देवकन्याःस्वर्गस्था
अपिसुन्दरि गुरौसूर्योदयेगत्वाश्मशा
ननिलयप्रिये जपन्मूलायुतंदेविहो
मंकुर्याद्विधानतः घृतैश्चदधिक्षीरैश्च
मृद्वीकामालतीपुष्पैः श्रीफलैःसहस्रा
देविवशयेद्भुवनत्रयं शुक्रेनिशामुखे

का
५

गत्वा वटमूले जपेन्मन्त्रम् भूमौ यंत्रं जपे
न्मंत्रैर्वर्णैः संवेष्टयन्नतः अयुतं तत्र जपेन्
मंत्रं होमं कार्यं सर्पिषा द्वादशाः
विभिक्षुण्णेगेणा मंत्रेण च पायसैः कर्मेण
मनसा वाचा रिपुं भ्रंशयेद्ध्रुवं प्राणेभ्र
भातस्समये कृत्वा कर्माह्निकं सुधीः
श्मागत्वा सार्वं नशाद्यांते विधायासनशो।
धने जप्त्वा मूलं अयुतं मंत्री होमयेत्सा-
र्पिषां द्विजैः चतुर्दशसहस्राणि ग्रहा-
णां देवि कोपितं यद्वाणां र्द्दसमानां च
मारीभीते महद्भावी उपद्रवानां सर्वेषां
महाशान्तिर्भविष्यति सत्तन्मादिवसा-
जन्मकालावसानके तथा होमयेद्ध्रु
तहोरादिपयसामलकत्वचा स्वदोट

वंदेनवक्रमौनमांससमन्वितं मनुष्या
णां देवतानां रोगार्त्तानां महेश्वरि बाला
दीनां नृपादीनां महाशुद्धिः प्रजायते स्व
विवाहदिने देविकामातुः साधकोत्तमः
यथोक्तविधिना सम्यग्देवीपूजां चरेन्न।
नः घृतपायसमन्हीकाशांकरादिभक्ष
नैकैः वंध्यापि सुतवत्सापि लभते संति
तं शुभां तिष्ठेवा करसोत्पन्नेमध्याह्नेवा
र्धरात्रके श्मशाने वा समागत्य भूम्या।
गारं तच्चैव च यथोक्तपूजया देवं पूज
यित्वा सशक्तिकं अयुतं प्रजपेन्मूलं
होमयेद् घृतपायसं अन्नोपहारमेकैव
मीनकेठकमांसजं स्त्रीगर्भान्नि विंशेद्
होयेगी रोगी समरीरुपः मुक्तिमाप्नोति दे

वंत्वंसम्यंजानीहिमद्भवः पंचैतेप्रयोगाःस
कलाःसाध्यसाधकसत्तमैः गोपनीया
प्रयत्नेनरक्षार्थेस्वात्मनःश्रिये इत्येषप
टलोदितःप्रथमंमायास्वरेश्वरि गुह्यमेव
स्वमीशास्यरक्षणीयंस्वपुत्रवत इतिवि
श्वसारेतंत्रेकामेश्वरपटलंसमाप्तम् ॥
ॐश्रीभैरवउवाच अधुनानित्यपूजायाः
पद्धतिंगह्वरूपिणीं प्रवक्ष्यामितवश्री॰
त्यासर्वतंत्रेषुगोपितां गद्यपद्यमयींदि
व्यांप्रातःकृत्यादिविग्रहं गोप्यांत्वद्देको
नंपंचाह्वांणीबीजमंत्रीष्टाणा श्रीमत्का॰
मेश्वरस्यास्यभोगनिर्वाणसिद्धिदां तत्र
श्रीमान्साधकोबालेमुहूर्तेउत्थायश्री
वत्सपंकेकृत्वाहस्तपादादिप्रक्षाल्याच

स्य निजासनेसमुपविश्य निजशिरसि
श्वेतवर्णाधोमुखसहस्रदलकमलक
र्णिकांतर्गतंचन्द्रमण्डलसिंहासनोप
रिनिषण्णंस्वगुरुंशुक्लवर्णंशुक्लालंका
रभूषितंज्ञानानन्दमुदितमानसम् स
च्चिदानन्दविग्रहंत्रिनयनंप्रसन्नवदने
दक्षिणवतभुजेज्ञानमुद्रापुस्तकवराभ
यकरं सर्वदेवदेवंपरमशिवस्वरूपंवा
मांगेवामहस्तधृतकमलयारक्तवस
नाभरणया स्वप्रिययादक्षिणभुजेना
लिङ्गितंशांतंसुप्रसन्नंध्यात्वा तच्चरण
कमलविगलदमृतधारयास्वात्मानंस्ना
तंविभाव्य मानसोपचारैराराध्य ॐऐं
ह्रींश्रींसहखफ्रेंहसरक्षमलवरयऊंह्सौं

का
प
८

ह्रैं श्रीमच्छ्रीअमुकानन्दनाथश्रीपादु।
कां श्रीपादुकां श्रीअमुकाम्बा श्रीपादु
कां पूजयामि नमः इति दशधा विमृश्य
मनसा दातुं (वन्) प्रणामं कुर्यात् ॐ नमामि
सद्गुरुं इत्यादि पूर्वोक्तध्यानोचितं का।
मेश्वरीसहितं देवं ध्यात्वा किंचिन्मात्रं
मूलं जप्त्वा जपं गुरवे समर्प्य अथ सूर्यो
दयात्समारभ्य सूर्योदयपर्यन्तं अजपा।
पाजपं षट्शताधिकमेकविंशति सह
स्रं संख्यकं श्वासानुसारेणाजपं विधाय इ
ति गुरवे जपं समर्प्य दात्ववस्त्राणमपत
दाज्ञां गृहीत्वा प्रातःप्रभृति सायान्तं सा
यादिप्रातरंततः यत्करोमि जगन्नाथ
तदस्तु तवपूजनम् इति श्लोकं यथाव

णा॥ नमो विनिशोधं च विधाय क्लीं काम
देवाय सर्वजनमनोहराय नमः इति दं
तान्विशोध्य मूलमंत्रेण हस्तपादमुख
प्रक्षालनं कृत्वा स्नानसामग्रीकं गृही
त्वा नद्यादौ गत्वा फट् अस्त्राय फट् इति
मंत्रेण तीरं प्रक्षाल्य तत्र सामग्रीकं धृत्वा
जले प्रथमतो मलधौतस्नानं कृत्वा स
पुरतो हस्तमात्रं चतुरस्रं विलिख्य
गंगे गंगे च यमुने चैव गोदावरि सरस्वती
नर्मदे सिंधु कावेरि जलेऽस्मिन्सन्निधिं कु
रु इत्यादि तीर्थमावाह्य जले श्रीचक्रं
विभाव्य तत्र कामेश्वरीसहितं कामे
श्वरं मूलेनावाह्य मानसैरुपचारैः संपू
ज्य सस्नाप्य वस्त्रभूषणादिकं परिधाय

जलेमूलमुच्चरन् त्रिर्निमज्ज्योन्मज्ज्याचा
चमेद्यथा मूलमंत्रमुच्चार्यआत्मतत्त्वं
शोधयामिस्वाहा मूलंविद्यातत्त्वं मूलं
शिवतत्त्वं ततोजलादाकृष्य ह्रीं हंसः
श्रीसूर्यायपद्मनेत्रायनमः इत्यर्घत्रयंद
त्वा श्रीकामेश्वरीसहितं श्रीकामेश्व
रंसूदिविसर्ज्यवहिरागत्यवाससीपरि।
धायउपविश्याचम्य वैदिकींसंध्यानि
र्वर्त्यतांत्रिकीमारभेत आदौप्राणाया
मत्रयंकुर्यात् पू॰ १६ कुं ६४ रे ३२
यथापूर्वोक्तैराचम्य मूलकेनजलमा
दाय वामहस्तेनतत्त्वमुद्रया लंवंरंयंहं
इतिपंचभौतिकमंत्रेणाभिमंत्र्य
शिरसिशातधातेनजलेनाभिषिच्याव।

शिष्टमुद्रकम् ३ इत्यंतनीत्वा शारीरंक
लंघप्रद्वात्स्यवहन् नासावर्त्मनातज्जले
सकलं पनिस्सार्य दक्षिणहस्तेन गृहीत्वा
त्वाऽस्त्रमंत्रेणवामभागस्थवज्रशिला
यामास्फाल्य ३ स्पचमर्षणं कृत्वा सूर्य
मण्डले देवं विभाव्य ध्यायेत् पंकामेश्व
रायविद्महे क्लीं शक्तीश्वराय धीमहि
सौस्रात्मा प्रचोदयात् ३ अनया गाय
त्र्या देवायार्घ्यत्रयं दत्वा ह्रीं हंसः श्रीसू
र्यप्रभते ह्रीं नमः इति श्रीसूर्यायार्घ्यत्र
यं दत्वा गायत्रीयथाशक्ति जपं कृत्वा जपं दे
वाय समर्पयेत् पंचाङ्गं कुर्यात् इति संध्या
विधिः ततस्तर्पणम् ॐ ह्रीं श्रीं भैरवाः
स्तर्प्यन्त एवं क्षेत्रपालः कुमार्यः योगि

का
५
८

नीगणाः सर्वभूतानि श्रीचक्रं त्रिकोणं
वा जले विभाव्य मूलेन श्रीमहात्रिपुरसुंद
रीसहितं कामेश्वरं सांगं सवाहनं सायु
धं सपरिवारं तर्पयामि नमः गुरूंस्तर्प्य
ब्रह्मादिकीटपर्यंतं च संतर्प्य पितृंस्तर्प
णं च कृत्वा पूर्ववदेवं संहारमुद्रया सुप
दिममानीय ह्रीं हंसः सूर्याय नमः इत्यर्घ्य
ं दत्वा शिवोहमिति भावयन् यागगे
हमागच्छेत इति तर्पणविधिः ततो ह्रां
यागेपादोपस्थाल्यं हूं फट् ह्रां प्रक्षा
ल्य कुर्यात् गणेशाय नमः वामदक्षिण
क्रमेण महालक्ष्म्यै नमः सरस्वत्यै नमः
गंगायै नमः यमुनायै नमः धात्रे नमः
विधात्रे नमः नंदाय नमः सुनंदाय नमः

भवगुह्याय नमः वगुह्याय नमः क्षेत्रपा
लाय नमः वेतालाय नमः अग्निवेताला
य नमः इति संपूज्य यागमण्डपान्तः प्रवि
श्य मूलमंत्रार्घ्यं आसनशोधनं कुर्यात्
ॐ आं आसनशोधनमंत्रस्य मेरुपृष्ठ
ऋषिः सुतलं छंदः कूर्मो देवता आस
नशोधने विनियोगः अनंतासनाय नमः
विमलासनाय नमः पद्मासनाय नमः
ह्रीं पृथिव्यै नमः पृथ्वि त्वया धृता लोका
देवि त्वं विष्णुना धृता त्वं च धारय मां नित्यं
पवित्रं कुरु चासनम् ॐ ह्रीं कूर्माय नमः सना
ॐ ह्रीं पद्मासनाय नमः ॐ ह्रीं शांतपत्र
कर्णिकायै नमः इत्याधारं संपूज्य अप
सर्पंत्वित्यादिना तलत्रयं दत्वा नाराचमु

का
पं
९

9

द्रोणदर्शय विज्ञानगुत्सार्थ पूर्ववत्प्राणाया
मत्रयं कुर्यात् तत्र हृत्सरसि मेत्रेणाहृदि
स्थं जीवात्मानं स्वशिरःस्थसदाशिवे सं
योज्य वामांगे पापपुरुषं कृष्णवर्णं ब्र।
ह्महत्याशिरःपापपुंसं रक्तश्मश्रुविलो।
चनम् ब्रह्महत्याशिरस्कं च स्वर्णस्ते
यभुजद्वयम् सुरापानहृदायुक्तं गुरु।
तल्पकटिद्वयं तत्संसर्गिपदद्वंद्वमंग
प्रत्यङ्गपातकं उपपातकरोमाणं रक्त
श्मश्रुविलोचनं खड्गचर्मधरं पापमं
गुष्ठपरिमाणकं अधोमुखं कृष्णवर्णकं
वापं कुक्षौ विचिंतयेत् एवं ध्यात्वाहृ
दिस्थानीयप्रशोषणादि कुर्यात् यथा
प्राणायामत्रयेणानंतरं तिवायुबीजं षो

ऽशधाज्जपेत् वामनासया वायुमापूर्य पु
नश्चतुःषष्टिवारं कुंभकेन जपेत् तदुत्
थवायुना तत्पापपुरुषं सदेहं संशोष्य ततः
मात्रषट्कं ध्यात्वा द्वात्रिंशता दक्षिणना
सया रेचयेत् पुनर्दक्षिणनासया रमिति
वह्निबीजं षोडशधा जपेत् वायुमापूर्य
पुनश्चतुःषष्टिवारं कुंभकेन जपेत् वह्नि
कुंभयित्वा तदुद्भवाग्निना तत्पापपुरुषं
भस्मसात्कृत्वा पुनस्तद्भस्म द्वात्रिंशद्वि
वामनासया रेचयेत् पुनर्वामनासया
वायुमापूर्य वमित्यमृतबीजं षोडशधा
जपेत् तदीयेन चंद्रमण्डलं संचिंत्य वायुं
कुंभयित्वा चतुःषष्टिवारं जपेत् तदुद्भवे
नामृतेन स्वशरीरं संपूर्णमाप्याय परिप्लुतं

का
पं
९

10

विभाव्य पुनर्द्वात्रिंशद्भिर्दक्षिणनासया रे
चयेत ततः सोहमिति जीवात्मानं स्वहृद
येसमानीय प्राणप्रतिष्ठां कुर्याद्यथा ॐ
आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोहं प्रा
णा इह प्राणाः एवं मम जीव इह स्थितः
मम सर्वेन्द्रियाणि इह स्थितानि वाङ्मन
स्त्वक्चक्षुः श्रोत्रजिह्वाघ्राणप्राणा इहा
गत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्र
तिष्ठाक्रमः इति प्राणाभूतस्य ह्यादिप्राण
प्रतिष्ठां कृत्वा श्रीकामेश्वरो देवता श्री
बीजं ह्रीं शक्तिः क्लीं कीलकं विनियोगः
अस्य श्रीकामेश्वरमन्त्रस्य दक्षिणामूर्ति
ऋषिः पङ्क्तिश्छन्दः श्रीकामेश्वरो देव
ता श्रीं बीजं ह्रीं शक्तिः क्लीं कीलकम्

नित्यपूजार्थे विनियोगः दक्षिणामूर्ति
ऋषये नमः शिरसि पंक्तिश्छन्दसे नमो।
मुखे कामेश्वरी देवतायै नमः हृदये श्रीं
बीजाय नमो गुह्ये श्रीं शक्तये नमः पा
दयोः ह्लीं कीलकाय नमः नाभौ नि
त्यपूजायां विनियोगः सर्वांगेषु इति ऋ
ष्यादिन्यासो विधाय मातृकान्यासं कु
र्वीत अस्य श्रीशुद्धमातृकान्यासम।
न्त्रस्य श्रीब्रह्मा ऋषिः गायत्रीश्छन्दः
श्रीमातृकासरस्वती देवता हलो बी।
जानि स्वराः शक्तयः अव्यक्तं कीलकं
श्रीविद्यांगत्वेन न्यासे विनियोगः अं।
कंखंगंघंङं आं अंगुष्ठाभ्यां नमः इं चं
छंजंझंञं ईं तर्जनीभ्यां स्वाहा उं टंठंडं।

ढं णं ऊं मध्यमाभ्यां वषट् एं तं थं दं धं नं
ऐं अनामिकाभ्यां हुं ओं पं फं बं भं मं औं
कनिष्ठिकाभ्यां वौषट् अं यं रं लं वं शं षं
सं हं ळं क्षं अः करतलकरपृष्ठाभ्यां फ
ट् एवं षडङ्गन्यासः अं नमः शिरसि
आं नमः मुखवृत्ते इं नमः दक्षनेत्रे ईं न
मः वामे उं नमः दक्षकर्णे ऊं नमः वामे
ऋं नमः दक्षनासापुटे ॠं नमः वामे ऌं
नमः दक्षगण्डे ॡं नमः वामे एं नमः ऊ
र्ध्वोष्ठे ऐं नमः अधरोष्ठे ओं नमः ऊर्ध्वदन्त
पङ्क्तौ औं नमः अधोदन्तपङ्क्त्यां अं नमः
चिबुके अः नमः शिरसि कं नमः दक्षि
णबाहुमूले खं नमः कूर्परे गं नमः म
णिबन्धे घं नमः अङ्गुलिमूले ङं नमः अ

गुल्यग्रे चं नमः वामबाहुमूले छं नमः
कूर्परे जं नमः मणिबंधे झं नमः अंगु
लिमूले ञं नमः अंगुल्यग्रे टं नमः दक्ष
पादमूले ठं नमः जानुनि डं नमः गुल्फे
ढं नमः अंगुलिमूले णं नमः अंगुल्या
ग्रे तं नमः वामपादमूले थं नमः जा
नुनि दं नमः गुल्फे धं नमः अंगुलिमू
ले नं नमः अंगुल्यग्रे पं नमः दक्षपार्श्वे
फं नमः वामे बं नमः पृष्ठे भं नमः नाभौ
मं नमः जठरे यं नमः हृदि रं नमः दक्षि
णांसे लं नमः वामांसे वं नमः ककुदि
शं नमः हृदादि दक्षहस्ताग्रांतं षं नमः
हृदादिवामहस्ताग्रांतं सं नमः हृदादि
दक्षपादपर्यंतं हं नमः हृदादिवामपादां।

का
हृ
१२
12
मु

ते ऐं नमः पादादिशिरःपर्यन्तम् ह्रीं न
मः शिरसः पादपर्यन्तम् इति मन्त्रस्य स्व
शिरस्थवर्णान्रविंदे मातृकासरस्वतीं ध्या
येत् अर्कों[illegible]क्र शशांककोटिसदृशीं ।
मापीनवेरास्तनीम् चन्द्रार्धाङ्कितमस्त कि
कां मधुमदालोलनेत्रत्रयीम् बिभ्रा
णां मनिशं वरं जपवटीशूलं कपालं क
रैराद्यां यौवनगर्विताङ्लिपितनुं वागीश्व
रीमाश्रये इति ध्यात्वा न्यासं कुर्यात् य
था ऐं नमः मध्यमयोः क्लीं नमः अनामिक
योः सौः नमः कनिष्ठिकयोः ऐं नमः मध्य
मयोः क्लीं नमः अनामिकयोः सौः नमः ।
कनिष्ठिकयोः ऐं नमः अङ्गुष्ठयोः क्लीं न
मः तर्जन्योः सौः नमः करतलपृष्ठयोः इ

तिकरशुद्धिन्यासः ॐ ह्रीं क्लीं सौं आ
न्मासनाय नमः मूलाधारे हैं ह्स्क्लीं
ह्सौं वीरासनाय नमः हृदि ह्सैं ह्स्क्लीं ह्सौः
सर्वमन्त्रासनाय नमः कण्ठे ह्रीं क्लीं
साध्यसिद्धासनाय नमः ब्रह्मरन्ध्रे ऐं क्लीं
सौं कामेश्वरमोहने २ इत्यात्मरक्षां कु
त्वा षडङ्गं कुर्यात् यथा श्रीं ह्रीं ऐं प्रथम
कूटं हृदयाय नमः २ क्लीं द्वितीयं शिर
से स्वाहा ३ सौः तृतीयं शिखायै वषट् ४
ऐं प्रथमं कवचाय हुम् ५ क्लीं द्वितीयं
नेत्रत्रयाय वौषट् ६ सौः तृतीयं अस्त्रा
य फट् ७ श्रीं कण्ठपूर्णोदरीभ्यां नमः
शिरसि ॐ ह्वां अनन्तेशपतिराजाभ्यां नमः य
मुखवृत्ते ईं मृदेशमाधवशाल्मलीभ्यां नमः

का
१
३

दक्षनेत्रे ईं त्रिपत्नीशलोलाक्षीभ्यां नमः
वामे उं अमरेशावर्तुलाक्षीभ्यां नमः दक्ष
कर्णे ऊं अर्घीशदीर्घघोणाभ्यां नमः वा
मे ऋं भावभूतेशदीर्घमुखीभ्यां नमः दक्ष
नासापुटे ॠं अतिथीशगोमुखीभ्यां न
मः वामे लृं स्थाण्वीकेशदीर्घजिह्वाभ्यां
नमः दक्षगण्डे ॡं हरीशकुण्डोदरीभ्यां न
मः वामे एं पराङ्गीशोर्ध्वकेशीभ्यां नमः
ऊर्ध्वोष्ठे ऐं भौतिकेशाविकृतमुखीभ्यां
नमः अधरोष्ठे ओं सद्योजातेशज्वाला
मुखीभ्यां नमः ऊर्ध्वदन्तपङ्क्तौ औं अक्रूरे
शश्रीमुखीभ्यां नमः शिरसि अः महासे
नेशविद्यामुखीभ्यां नमः मुखान्तरे कं
क्रोधीशमहाकालीभ्यां नमः दक्षबाहुमू

औंकपिलज
टीभ्यां नमः
अधोदन्तपङ्क्तौ

ले खं खेटेशा सरस्वतीभ्यां नमः कूर्परे
गं पंचांतकेशा सर्वसिद्धिभ्यां नमः मणि
बंधे घं शिवोत्तमेशा त्रिलोकविद्याभ्यां
नमः अंगुलिमूले ङं रुद्रेशा त्रिमूर्तिभ्यां
नमः अंगुल्यग्रे चं कूर्मेशा आत्मशक्तिभ्यां
नमः वामबाहुमूले छं एकनेत्रेशा भूत
मातृभ्यां नमः कूर्परे जं चतुराननेशा लं
बोदरीभ्यां नमः मणिबंधे झं अजेशा द्रा
विणीभ्यां नमः अंगुलिमूले ञं शर्वेरे।
शा नागेश्वरीभ्यां नमः अंगुल्यग्रे टं सोमेशा
खेचरीभ्यां नमः दक्षपादमूले ठं लांगू।
लीशा मंजरीभ्यां नमः जानुनि डं दारुके
शा रूपिणीभ्यां नमः गुल्फे ढं अर्धनारी।
शा वारिणीभ्यां नमः अंगुलिमूले णं उ।

माकांतेशाकाकोदरीभ्यांनमः अंगुल्यग्रे
नेंग्राषाढेशापूतनाभ्यांवामपादमूले
धंदण्डेशाभद्रकालीभ्यांनमः जानुनि
दंअत्रेशायोगिनीभ्यांनमः गुल्फे धंमीने
शांशंखिनीभ्यांनमः अंगुलिमूले नंमे
षेशागर्जिनीशाभ्यांनमः अंगुल्यग्रे पं
लोहितेशाकालरात्रिभ्यांनमः दक्षपार्श्वे
फंशिखीशाकुब्जिनीभ्यांनमः वामपार्श्वे
वंछगलाण्डेशाकपर्दिनीभ्यांनमः पृ
ष्ठे भंद्विरण्डेशावज्रिणीभ्यांनमः नाभौ
मंमहाकालीशाजयाभ्यांनमः उदरे यं
वालेशासुमुखीभ्यांनमः हृदये रंभुजं
गेशारेवतीभ्यांनमः वामांसे लंपिनाके
शामाधवीभ्यांनमः ककुदि वंश्वकेशा।

वारुणीभ्यां नमः दक्षांसे शं वं केशवा।
ग्रुवीभ्यां नमः हृदादिदक्षपाण्यंते षं श्वे
तेशरद्योर्ध्वधरीभ्यां नमः हृदादिवामपा
ण्यन्ते सं भृंगीशसहजाभ्यां नमः हृदा
दिदक्षपादांते हं नकुलीशलक्ष्मीभ्यां।
नमः हृदादिवामपादांते लं शिवेशव्योम
नीभ्यां नमः पादादिशिरःपर्यंते क्षः सं
वर्तकेशमहाशाभ्यां नमः शिरसः पाद
पर्यंतं इति श्रीकण्ठादिमातृकान्यासः
अथ कलान्यासः ऐं ह्रीं सौं निवृत्तिक।
लात्मने ब्रह्मणे नमः अंगुष्ठाभ्यां नमः ऐं
प्रतिष्ठाकलात्मने विष्णवे नमः तर्जनी।
भ्यां स्वाहा ऐं विद्याकलात्मने रुद्राय न।
मः मध्यमाभ्यां वषट् ऐं शांतिकलात्म

नेश्वराय नमः अनामिकाभ्यां हुम् ऐं
शान्त्यतीताकलात्मने सदाशिवाय न
मः कनिष्ठाभ्यां वौषट् ऐं ज्योतिष्कलात्
मने परंब्रह्मणे नमः करतलपृष्ठाभ्यां फ
ट् इति करन्यासः एवं षडङ्गन्यासः ततः
पूर्ववन्मूलन्यासं कुर्यात् ऐं मूलाधारे
क्लीं भ्रूमध्ये सौः कंठे इत्थं न्यासत्रयं
शक्त्या विधाय दिव्यदेहं ध्यात्वा हृदये
ऐं क्लीं सौः कामेश्वरपीठाय नमः हृदि
गत्वा तत्र पुष्पं संपूज्य ऐं क्लीं सौः द्विवारं
षडङ्गन्यासं कुर्यात् इत्थं न्यासं विधाय मा
नसैरुपचारैः संपूज्य बहिः श्रीचक्रं विलि
ख्य संस्थाप्य वा पूजयेत् यथा तच्चक्रं च
तुरस्रं बोरशादलमष्टपद्मं चंद्ररूपं वर्तुंदे

शारदशारदयमर्कन्द्रुपंग्रष्टदलत्रिकोणे
विंदुकमग्निरूपंकंधात्वामूलमुख्यार्थं
समस्तागमागमंतरंमंत्रदायककुलकौल
निगर्भरहस्यातिरहस्ययोगिनीचक्रपा
दुकाभ्योनमः इतिचक्रेपुष्पांजलिंदत्वा
तत्रयोगपीठपूजांकुर्यात् यथा ह्रींश्रीम
ण्डूकायनमः ॐकालाग्निरुद्रायनमः
मूलप्रकृत्यैनमः आधारशक्त्यैनमः कू
र्मायनमः अनंतायनमः वराहायनमः
पृथिव्यैनमः इतितदुपर्युपरिसंपूज्य त
न्मध्ये नवरत्नविराजितायनवखण्ड
मयद्वीपायनमः तत्र ईशानादिषुपूष्प
शाद्वलितायेन मध्येपद्मरागरत्नखण्डा
यनमः ईशाने नीलरत्नखण्डायनमः

का
पं
१८

10

आग्नेये विद्रुमरत्नखण्डायनमः दक्षिणे
मौक्तिकरत्नखण्डायनमः नैरृत्ये मर
कतरत्नखण्डायनमः पश्चिमे वज्ररत्न
खण्डायनमः वायव्ये गोमेधरत्नखण्डा
यनमः [illegible] उत्तरे एतन्मध्ये सहस्र
स्तम्भान्वितमध्यस्तम्भान्वितमध्यस्तम्भ
विवर्जितपञ्चाशद्योजनविस्तीर्णनाना
रत्नखचितचिंतामणिमण्डपायनमः
तन्मध्ये नवरत्नखचितरत्नमयवेदि
कायैनमः तदुपरिमध्ये रत्नसिंहास
नायनमः तदुपरि न[illegible]छत्रायन
मः सिंहासनपार्श्वेपीठस्यकल्पिताग्नि
कोणादिषु धर्मायनमः ज्ञानायनमः
वैराग्यायनमः ऐश्वर्यायनमः कल्पि

तत्पूर्वादिषु अं धर्माय नमः अं ज्ञानाय
नमः अं वैराग्याय नमः अं नैश्वर्याय न
मः सिंहासनमध्ये आनन्दकन्दाय न
मः सं विद्यानालाय नमः सहस्रदलक
मलाय नमः प्रकृतिमयपत्रेभ्यो नमः
विकृतिमयकेसरेभ्यो नमः पंचाशद्व
र्णबीजाढ्यसर्वतत्त्वरूपायै कर्णिका
यै नमः कर्णिकोपरि अं अर्कमण्डला
य नमः सं सोममण्डलाय नमः रं वह्निम
ण्डलाय नमः तं तमसे नमः रं रजसे नमः
सं सत्त्वाय नमः पं ह्रीं सौः मूलमन्त्रार्थ
सर्वमन्त्रासनाय नमः २ अं आं इत्यादि
क्षान्तमन्त्रार्थं शिवशक्तिसदाशिवेश्व
रशुद्धविद्यामायाकलाविद्यारागकाल

का
प
१२
17

नियतिपुरुषप्रकृत्यहंकारबुद्धिमनस्त्व
क्चक्षुःश्रोत्रजिह्वाघ्राणवाक्णि पा
पादपायूपस्थशब्दस्पर्शरूपरसगंधा
काशवायुवह्निसलिलपृथिव्यात्मने।
योगपीठायनमः इतिपुष्पाक्षतादि
भिः पीठंसंपूज्य अमृतीकरणमुद्रांब
द्ध्वा पद्ममुद्रांतर्गतंपुष्पमंत्रितायाः मू
लाधारात्कुंडलिनीं उदितां टिप्रद्योति को
नीं सूर्यकोटिप्रतीकाशां वह्निकोटिदु
राधर्षं चंद्रकोटिसुशीतलं प्रदीपकलि
काकारामुच्चार्य सुषुम्नामार्गेण ब्र
ह्मपद्मान्तरस्थां कामेश्वरेण संयोज्य
सोममण्डलप्रच्युतामृतधारया संतर्प्य
संतर्प्य पुनः स्वहृदिसमानीयमुद्रयाने

स्थापयित्वा कामेश्वरमयोभूयशिवोऽहमि
ति भावयेत् चंद्रकोटीति ध्यानं ध्यात्वा
स्नानसैरूपचारैः संपूज्य कलशस्थाप
नं कुर्यात् स्ववामे त्रिकोणषट्कोणाष
ट्कोणचतुरस्रं विलिख्य श्रीं त्रिखण्डमुद्रां प्र
दर्श्य षडंगमंत्रैः संपूज्य फट् इति प्रक्षा
ल्य मूलेन संपूज्य रं वह्निमण्डलाय दश
कलात्मने नमः इति संपूज्य आधारं सं
स्थाप्य तत्र पात्रं आधारे निधाय अं अर्क
मण्डलाय द्वादशकलात्मने नमः इति
पात्रान्तः संपूज्य तत्र जलेन संपूज्य सं सो
ममण्डलाय षोडशकलात्मने नमः सं
पूज्य तत्राङ्कुशमुद्रया गंगे च यमुने चैव
गोदावरि सरस्वति नर्मदे सिंधु कावेरि।

जलेऽस्मिन्सन्निधिं कुरु इत्यादिना तीर्थ्य।
मावाह्य मूलेनाष्टाभिमंत्रितं कृत्वा धेनु
योनिकलशमुद्राः प्रदर्शयेत् इति श्लो
टिकाभिः संरक्ष्यमित्यवगुण्ठ्य शंखे
चक्रयोनिमुद्राः प्रदर्शयेत् एतत् दर्शनेना
पिशाचस्य किं पुनः स्पर्शनेनच विलयं।
यान्ति पापानि हिमवद्भास्करोदये इति सा
मान्यार्घ्यविधिः ततः कलशस्थापनम्
सामान्यार्घ्यस्य दक्षे धारांगतत्रिको
णषट्कोणवृत्तचतुरस्रमण्डलं निर्मा।
य कामरूपोड्डियानजालंधरपूर्णगि।
रिपीठेभ्यो नमः इति चतुरस्रं संपूज्य षट्
कोणं प्रदक्षिणेन मूलं प्रथमकूटेन दद्या
य नमः मूलं द्वितीयशिरसे स्वाहा मूलं

तृतीयं शिखायै वषट् मूलं प्रथमं कव-
चाय हुम् मूलं द्वितीयं नेत्राभ्यां वौषट्
मूलं तृतीयं अस्त्राय फट् इति षट्कोणे
षडङ्गं संपूज्य रं वह्निमण्डलाय दशक-
लात्मने नमः इति वह्न्यालये आधारं संस्था-
प्य अं अर्कमण्डलाय द्वादशकलात्मने
नमः इति कलशं कुंभमुद्रया संस्थाप्य
तत्र ह्रां ह्रीं ह्रुं ह्रैं ह्रौं ह्रः श्रीकामेश्वरभै-
रवाय नमः इति मूलेन तत्वमुद्रया धार-
पातेन परमानन्दद्रव्यादिना कुंभमापूर्य
सौं सोममण्डलाय षोडशकलात्मने न-
मः इति गन्धाक्षतपुष्पैरभ्यर्च्य हंस इति
मन्त्रेण दशदिशो बद्ध्वा स्फोटिकाभिः सं-
रक्ष्य ऊर्मिमवगाह्य नमस्सुभ्यं ह्वो मू-

का
मृ
१९
19

लं दशधा जप्त्वा अमृतप्रयोगः प्रदर्श्यते ओं पं
श्रं श्रों रं पें ह्रीं सौं अमृते अमृतेश्वरि अमृ
तवर्षिणि अमृतं स्रावय २ पें ह्रीं सौं
अमृतेश्वरीभैरवाय नमः इति दशधा जप्त्वा ३ मृ
धम एउलं मृते वरुणालयं संभवे अ
माबीजमयं देवि शुक्रशापाद्विमुच्यतां
रे वेदानां प्रणवो बीजं ब्रह्मानन्दमयो यदि
तेन सत्येन देवेश ब्रह्महत्यां व्यपोहतु रे
एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहं ३
ब्रह्मशापविनिर्मुक्ता कुलाशुक्रशापतः
विमुक्ता सह शापेन पवित्रा भव सांप्रतं रे
पावमानः परं ब्रह्म पावमानः परो रसः
पावमानः परं ज्ञानं तेन त्वां पावयाम्यहम्

इतित्रिर्जप्त्वा ऐं ह्स्रद्रमलवयरूं स्फ्रां ने

त्रेश्वरभैरवाय वौषट् इति दशधा जप्त्वा

स्ह्रद्रमलवरयरूं स्हौः देव्यै वौषट् इति

दशधा जप्त्वा मूलं त्रिर्जप्त्वा गंगेवेन्पञ्ज

पा — मुद्रया तीर्थं प्रणवाद्ये ॐ इलिनीं।

ज्योतीरूपा सुस्थानषट्चक्राभित्त्वा + ते

योऽस्मा अमरस्योद्भवानन्दामृतवाहमान

न्देनासापुटनिःसृतामृतधारयाकलश

मापूर्यामृतमयं ध्यात्वा गंधादितन्मयैः

पुष्पैरभ्यर्च्य ऐं ह्रूं योनिमन्त्रमुद्राः प्रदर्श्य

प्रणमेदितिद्रव्यशुद्धिः ऐं क्लीं सौः हंसः प

रमामृतेश श्रीत्रिपुरसुन्दरीकामेश्वर।

वेद्यामृतमयेन कलशामृतेन यागद्र।

व्याणि पवित्रीकुरु २ स्वधादिनाप्लावय २

+ ब्लूं रं ड्रम्प परम
शिवभट्टारकौ
नियोज्य हंसः सो
हं स्वाहा इति वि
विन्य +

का
पू
४५

ॐ स्वाहा इति पाशवस्तूनि संशोध्य सामा
मर्घ्यस्याधः त्रिकोणं सहं विभाव्य मू
लबीजत्रयेण त्रिकोणं संपूज्य मूलवि
द्ययाबिंदुमभ्यर्च्य तत्राग्निसूर्यसोममंड
लानि संपूज्य आदिस्थपात्रं संस्थाप्य कल
शमस्तेनापूर्य मूलविद्यया संपूज्य ॐ
हृषिकादि षट्त्रिंशत्तत्वानि संपूज्य स
हाभुद्राः प्रदर्श्य पञ्चामृतमुद्राः प्रदर्श्य
मातृकादेवीं संपूज्य मूलवर्णैस्तत्रैव
संपूज्य गंगादितीर्थान्यावाह्य शिवम
यं ध्यात्वा परमामृतबुद्ध्याविंदुपानास्थि
दीपं प्रज्वाल्य शिवमयं जगद्भावयेत्
इति परमार्घ्यपात्रं सामान्यार्घ्यस्य वाम
गुरुशक्तियोगिनीवीरवटुकक्षेत्रपाल

णिमाख्यायां पाद्याचमनीयमधुपर्का
चमनीयार्घ्यपात्राणि स्थापयेत् इति
पात्रस्थापनम् पाद्यादिपात्रेषु पानीयं
गुरुपात्रादिषु दिव्यामृतम् तत्रात्मानं
मूलविद्यया संपूज्य स्वाधारात्कुंडलि।
नीमुत्थाप्य परमशिवेन संयोज्य चंद्रम
ण्डलस्थश्रीकामेश्वरललाटावतंसच
न्द्रकलास्रुतामृतधारया स्वात्मानं सं
प्लाव्य शिवोऽहमिति स्मृत्वा चिदानंदम
यो भूत्वा विश्वं श्वेतमिव ध्यात्वा सदेवी
कं शिवं हृत्कमले ध्यात्वा यथोक्तं स्मृ
त्वा मंत्रैरुपचारैः संपूज्य स्वात्मानं त
न्मयं भावयित्वा श्रीचक्रं पूर्वोक्तं प्रस्ता
ल्प श्रीरत्नपीठे संस्थाप्य योगपीठपूजां कु

का
पू
२१

यीत मूलं स्त्रं स्त्रामित्यादिहांतमस्त्रार्थ
शिवशक्तिसदाशिवेश्वरशुद्धविद्यामाया
कलाविद्यारागाकालनियतिपुरुषप्रकृ
त्यहंकारबुद्धिमनस्त्वक्चक्षुः श्रोत्रजि
ह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्प
र्शरूपरसगंधाकाशवायुरग्निकालस
लिलपृथ्व्यात्मने श्रीयोगपीठायनमः
इति श्रीचक्रे संपूज्य ऐं ह्रीं सौः ॐ नमो
भगवते सकलगुणात्मशक्तियुक्ताय
परानंताय योगपीठात्मने नमः इति यो
गपीठं संपूज्य प्रमृतीकरणमुद्रां बद्ध्वा
मूलमंत्रेण संकल्प्य आवाहयेत् मूले
न सकुंडल्या हृत्कमलस्थज्योतिः वाम
नासयानिःसार्य करस्थपुष्पे संस्थितं ध्या

त्वां देवमावाहयेत् स्वात्मसंस्थमजं
शुद्धं त्वामहं परमेश्वरं अरण्यामिव हव्या-
शं विद्यावावाहयाम्यहं देवेश भक्ति-
सुलभे परिवारसमन्विते यावत्त्वां पू-
जयिष्यामि तावद्देव इहावह इति मूल-
मुच्चार्य ए त्रिपुष्पांजलिं दत्वा आवाह-
नं स्थापनसंनिरुद्ध्य मूलेन दशमुद्रा
प्रदर्श्य ए त्रिपुष्पांजलिं एं रं लं वं शं षं
सं हं ऐं क्लीं सौः हंसः त्रिपुरसुन्दरीसहि-
तस्य कामेश्वरस्य प्राणा इह प्राणाः ए-
वं जीव इह स्थितः एवं सर्वेन्द्रियाणि वा-
ङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वाघ्राणप्रा-
णा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा इ-
ति देवदेवयोः प्राणान्दत्वा एवं मुद्राः प्र

का
पू
२२

दर्श्य धेनुमुद्रयामृतीकृत्य महामुद्र।
यापरमीकृत्य षडंगेसकलीकृत्य शंख
चक्रत्रिशिखरपाशकलशमालामुद्राः प्र
दर्श्य भगवन् श्रीत्रिपुरसुन्दरीसहि।
तश्रीकामेश्वरइदमासनंशुद्धानाम फ
ट् भगवन्स्वागतेश्वरदीयनमस्कृत्य
मुद्रयाप्रणाम्य स्वागतं भगवन्महादेवी।
कपाद्यंनमः मूलम् भ॰म॰ आचमनी
यं स्वधा मूलम् भ॰म॰ मधुपर्कः स्व।
धा मूलं भ॰म॰ इदमर्घ्यंस्वाहा मूलं भ॰
म॰ पयसे गन्धायनमः मूलम् भगाम॰ अ
क्षतपूर्वं पत्राणि पुष्पाणि चैव षट् एषा
मार्कंचैव पूर्वाकेशिवाक्रान्ताभिमि
श्रितम् गंगोदकं समादाय मूलमन्त्रे।

णं समर्पयेत् मूलं भ॰ स॰ देद्वीकनैवेद्यं
सर्वौगेगेगोदकस्नानीयं नमः मूल
भ॰ स॰ महाश्वेतमहाक्षौमवस्त्रद्वयं न॰
मः मूलं भगवः स॰ मुक्ताभरणानि नि
वेदयामि नमः मूलं भ॰ स॰ रत्नसिंहा
सने उपविश्यतां नमः मूलं भ॰ स॰ गंधा
द्यंत पुष्पाणि गृहाण वौषट् मूलं भ
गवान् सदेवीक धूपं गृहाण नमः मू
लं भ॰ स॰ गृहाण नमः मूलं भ॰ स॰ नैवे
द्यं गृहाण नमः इति धूपदीपौ दत्वा पर
मीकरणमुद्रां प्रदर्श्य त्रिकोणवृत्तम
ण्डलं विभाव्य साधारं पात्रं संस्थाप्य दि
व्योदं नवद्रुसोपेतनानाम्रजनान्वित
म येत्रमर्घ्यामृतीकृत्य प्रमृतोपस्त॰

का
पू
२२

णामसिस्वाहा इतिनिवेद्यमूलेंदशा
यानत्वा प्राणादिंपंचशरासमुद्राप्रद
र्श्य अमृतापिधानमसिस्वाहा इतिभ
गवतेशिवायजलंदत्वा मूलेनतांबू
लंनिवेद्य दक्षिणाग्रामतेनदक्ष्यांमत
र्प्यप्रणम्यपरिवारदेवतादेवांगान्निस्म
ताध्यात्वा यथोचि तस्यानेत्रसंस्थाप्य
ध्यात्वाप्रणामंपूर्वंप्राणायामत्रयंवि
धाय श्रीचक्रेपरिवारदेवतापूजयेत्त
त्रादौगुरुपंक्तित्रयंविभाव्यपूजयेत्त
दिव्यौघेभ्योगुरुभ्योनमः सिद्धौघेभ्यो
गुरुभ्योनमः मानवौघेभ्योगुरुभ्योन
मः तत्रदशलोकपालान्पूजयेद्यथा लं
इंद्रायवज्रहस्तायनमः रंअग्नयेशक्ति

हस्ताय नमः ह्रूं यमाय दंडहस्ताय नमः
ह्रैं नैरृत्याय खड्गहस्ताय नमः व्रूं वरुणा
य पाशहस्ताय नमः य्रूं वायवे ध्वजह
स्ताय नमः कूं कुबेराय गदाहस्ताय न
मः ह्रूं ईशानाय त्रिशूलहस्ताय नमः
ब्रां ब्रह्मणे पद्महस्ताय नमः ह्रं अनं
ताय हलहस्ताय नमः ततो मूलेन दे।
वें सह संतर्प्य ऐं योनिमुद्रया प्रणमे।
त् इति प्रथमावरणम् अथ षोडशदले
देव्यः पश्चिमादि प्रदक्षिणावर्तेन पूज।
येत ऐं ह्रीं सौः सर्वाशापूरकचक्राय न
मः इति पुष्पांजलिं दत्वा ऐं ह्रीं सौं श्री।
कामाकर्षिणी श्रीपादुकां पूजयामि नमः
तर्पयामि नमः ऐं ब्रों बुद्ध्याकर्षिणी श्री॰ ऐं

का
सू
२४

ॐ अहंकाराकर्षिणीश्री । ईं शब्दाकर्षिणीश्री
उं स्पर्शाकर्षिणीश्री । ऊं रूपाकर्षिणीश्री ।
ॠं गंधाकर्षिणीश्री । लृं चित्ताकर्षिणीश्री ।
लॄं धैर्याकर्षिणीश्री । एं स्मृत्याकर्षिणीश्री
ऐं नामाकर्षिणीश्री । ओं बीजाकर्षिणी-
श्री । औं आत्माकर्षिणीश्री । अं अमृता-
कर्षिणीश्री । अः शरीराकर्षिणीश्री इति
संपूज्य संतर्प्य मूलेन देवं संतर्प्य पं इति
योनिमुद्रया प्रणमेत् इति द्वितीयावर-
णम् ततो ष्टदले । सर्वसंक्षोभकारक-
चक्राय नमः इति पुष्पांजलिं दत्वा । ॐ
पं असितांगभैरवश्री । वं पं रुरुभैरव-
श्री । यं पं चंडभैरवश्री । तं पं क्रोधभै-
रवश्री । पं पं उन्मत्तभैरवश्री । यं पं क

पालेश्वरभैरवश्री ३ क्रोध भैर
णभैरवश्री ३ ॐ ह्रः संहारभैरव
श्री इतिसंपूज्यसंतर्प्य मूलेनमू
लेदेवं संपूज्य ऐं इतियोनिमुद्रया
प्रणमेत् इतितृतीयावरणम् ३
मेतश्चक्रदेचं दूपं ध्यायेत् अ
थचतुर्दशारचक्रे पश्चिमादिद
क्षिणावर्तेनपूजयेत् ३ सर्वसौ
भाग्यदायकश्रीचक्रायनमः ३
त्रिपुष्पांजलिं दत्वा ३ सर्वसंक्षो
भणीश्री ३ सर्वविद्राविणीश्री ३
सर्वाकर्षणीश्री ३ सर्वाह्लादनश्री
३ सर्वसंमोहनश्री ३ सर्वस्तंभन
श्री ३ सर्वजृंभनकारणश्री ३ सर्वव

का
पू
२५
२८

75/80

शंकरणश्री ३ सर्वरंजनश्री ३ सर्वो
न्मादनश्री ३ सर्वार्थसाधनश्री ३
सर्वसंपत्प्रपूरणश्री ३ सर्वमंत्रम
यश्री ३ सर्वद्वंद्वक्षयंकरश्री इति
सप्तजपसंतर्प्य इति योनिमुद्रया
प्रणमेत् मूलेन मूलदेवं सप्तजपसं
तर्प्यसंतर्पयेत् पुष्पवदिममाचारंच
द्वे पश्चिमादि दक्षिणावर्तक्रमेण पू
जयेत् इति चतुर्थावरणम् ३ स
र्वार्थसाधकचक्राय नमः इति पु
ष्पांजलिं दत्वा प्रणमेत ३ सर्वसिद्धि
प्रदेदेवि श्रीपा ३ सर्वसंपत्प्रदेदेवि श्री ३
सर्वप्रियंकरदेवि श्रीपा ३ सर्वमंगलका
रिणिदेवि श्री ३ सर्वकामप्रदेदेवि श्री ३ सर्व

विघ्ननिवारणदेवश्री ऐं सर्वांगसुन्दरदे
वश्री ऐं सर्वसौभाग्यदायनदेवश्री इति
संपूज्य संतर्प्य मूलेन मूलदेवं च त्रिः सं
तर्प्य ऐं इति योनिमुद्रया प्रणमेत् इति
पंचमावरणम् अथ चतुर्दशारचक्रे प
श्चिमादि दक्षिणावर्तक्रमेण पूजयेत् ऐं
सर्वरक्षाकरचक्राय नमः इति पुष्पांज
लिं दत्वा ऐं सर्वज्ञादेवश्री ऐं सर्वशक्ति
देवश्री ऐं सर्वैश्वर्यप्रददेवश्री ऐं सर्वज्ञा
नमयदेवश्री ऐं सर्वव्याधिविनाशनदे
वश्री ऐं सर्वाधारस्वरूपदेवश्री ऐं सर्वपा
पहरदेवश्री ऐं सर्वानंदमयदेवश्री ऐं
सर्वरक्षास्वरूपकदेवश्री ऐं महादेवस
र्वेप्सितफलप्रददेवश्री इति संपूज्य संत

का
पू
२२

ऐं मूलेन देवं मूलदेवं संपूज्य संतर्पयेत्
संपूज्य ऐं इति योनिमुद्रया प्रणमेत् इति
षष्ठावरणम् ३ सितश्चक्रत्रयं मूर्धन्यपस
मुष्टितया ऽन्तःसंध्याय ध्यायेत् इति द्विती
यचक्रम् अथाष्टारचक्रे देवदक्षिणभाग
स्थसमाभिक्रमेण पूजयेत् ऐं सर्वरोगह
रचक्राय नमः इति पुष्पांजलिं दत्वा ऐं अं
वशीकरश्री ऐं कं ५ ह्लीं कामेश्वरश्री
ऐं चं ५ ह्लीं कामेश्वरश्री चं ५ णं मोदन
श्री ऐं टं ५ अरुणश्री ऐं पं फं वं भं मं र
सहमलवरयऊं जयश्री ऐं यं रं लं वं णी
सर्वेश्वरश्री ऐं शं षं सं हं लं क्षं लीं कौ
लिनश्री ऐं इति योनिमुद्रया प्रणमेत्
इति सप्तमावरणम् अथान्तर्दशारचक्रे १९

पश्चिमादि देवदक्षिणावर्त्तेन सन्तर्पयेत् ऐं
सर्वरक्षाकरचक्राय नमः इति पुष्पां
जलिं दत्वा ऐं देवतामरश्मी· ऐं वराय
नमः देवतापुर ऐं अभयाय नमः ऐं
त्रिशूलरश्मी ऐं खड्गरश्मी ऐं सर्वसिद्धिप्र
दायचक्राय नमः त्रिकोणाग्रकोणे
मूलेवाग्भवं चतुरस्राये अन्तरात्मेश्वरश्री
पादु इति संपूज्य संतर्प्य मूलेन मूल
देवं संपूज्य संतर्पयेत इत्यष्टमावर्णे
ऐं क्लीं सौः सर्वानन्दमयैन्दवचक्रा
य नमः मूलविद्यया ऐं कामेश्वरश्री
पा इति त्रिसंतर्प्य पुनर्मूलम् श्रीत्रि
पुरसुन्दरीकामेश्वरपादुकाभ्यां गन्धं
समर्पयामि नमः एवं प्रदत्तान पुष्पा

लि ष्ठ २५

का
पू
२८

लिताम्बूलं दीपं नैवेद्यम् रत्नपात्रस्थितं।
दिव्यं नानाव्यंजनसंहितं दिव्योदकेन नि
वेद्यास्त्व परमाम्रनसंलतं श्रमत्सुदं।
यानि वेद्य शरणस्य मूलं तत्त्वावमनीय
